# shrI HanumadashtottarashatanAma stotram 8

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૮

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 8

File name : hanumadaShTottarashatanAmastotram8.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 122-125

Latest update : September 30, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૮

શ્રીપરાશરઃ -
સ્તોત્રાન્તરં પ્રવક્ષ્યામિ શ ૃણુ મૈત્રેય તત્ત્વતઃ ।
અષ્ટોત્તરશતં નામ્નાં હનુમત્પ્રતિપાદકમ્ ॥

આયુરારોગ્યફલદં પુત્રપૌત્રપ્રવર્ધનમ્ ।
ગુહ્યાદ્ગુહ્યતમં સ્તોત્રં સર્વપાપહરં નૃણામ્ ॥

અસ્ય શ્રીહનુમદષ્ટોત્તરશતદિવ્યનામસ્તોત્રમન્ત્રસ્ય વિભીષણ ઋષિઃ ।
પઙ્ક્તી છન્દઃ । શ્રીહનુમાન્ પરમાત્મા દેવતા ।
મારુતાત્મજ ઇતિ બીજમ્ । અઞ્જનાસૂનુરિતિ શક્તિઃ ।
વાયુપુત્ર ઇતિ કીલકમ્ ।
મમ શ્રીહનુમત્પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

શ્રી અભૂતપૂર્વડિમ્ભ શ્રી અઞ્જનાગર્ભ સમ્ભવઃ ।
નભસ્વદ્વરસમ્પ્રાપ્તો દીપ્તકાલાગ્નિસમ્ભવઃ ॥ ૧॥

ભૂનભોઽન્તરભિન્નાદસ્ફુરદ્ગિરિગુહામુખઃ ।
ભાનુબિમ્બફલોત્સાહો પલાયિતવિધુન્તુદઃ ॥ ૨॥

ઐરાવતગ્રહાવ્યગ્રો કુલિશગ્રસનોન્મુખઃ ।
સુરાસુરાયુધાભેદ્યો વિધાવેદ્યવરોદયઃ ॥ ૩॥

હનુમાનિતિ વિખ્યાતો પ્રખ્યાતબલપૌરુષઃ ।
શિખાવાન્ રત્નમઞ્જીરો સ્વર્ણકૃષ્ણોત્તરચ્છદઃ ॥ ૪॥

વિદ્યુદ્વલયયજ્ઞોપવીતદ્યુમણિમણ્ડનઃ ।
હેમમૌઞ્જીસમાબદ્ધશુદ્ધજામ્બૂનદપ્રભઃ ॥ ૫॥

કનત્કનકકૌપીનો વટુર્વટુશિખામણિઃ ।
સિંહસંહનનાકારો તરુણાર્કનિભાનનઃ ॥ ૬॥

વશંવદીકૃતમનાસ્તપ્તચામીકરેક્ષણઃ ।
વજ્રદેહો વજ્રનખઃ વજ્રસ્પર્શોગ્રવાલજઃ ॥ ૭॥

અવ્યાહતમનોવેગો હરિર્દાશરથાનુગઃ ।
સારગ્રહણચાતુર્યશ્શબ્દબ્રહ્મૈકપારગઃ ॥ ૮॥

પમ્પાનદીચરો વાગ્મી રામસુગ્રીવસખ્યકૃત્ ।
સ્વામિમુદ્રાઙ્કિતકરો ક્ષિતિજાન્વેષણોદ્યમઃ ॥ ૯॥

સ્વયમ્પ્રભાસમાલોકો બિલમાર્ગવિનિર્ગમઃ ।
આમ્બોધિદર્શનોદ્વિગ્નમાનસોઙ્ગદધૈર્યદઃ ॥ ૧૦॥

પ્રાયોપદિષ્ટપ્લવગપ્રાણત્રાતપરાયણઃ ।
અદેવદાનવગતિઃ અપ્રતિદ્વન્દ્વસાહસઃ ॥ ૧૧॥

સ્વદેહસમ્ભવજજઙ્ઘામેરુદ્રોણીકૃતાર્ણવ । મેરુ
સાગરશ્રુતવૃત્તાન્તમૈનાકકૃતપૂજનઃ ॥ ૧૨॥

અણોરણીયાન્મહતો મહીયાન્ સુરસાऽર્થિતઃ ।
ત્રિંશદ્યોજનપર્યન્તચ્છાયાછાયાગ્રહાન્તકઃ ॥ ૧૩॥

લઙ્કાહઙ્કારશમનશ્શઙ્કાટઙ્કવિવર્જિતઃ ।
હસ્તામલકવદ્દૃષ્ટરાક્ષસાન્તઃ પુરાખિલઃ ॥ ૧૪॥

ચિતાદુરન્તવૈદેહીસમ્પાદનફલશ્રમઃ ।
મૈથિલીદત્તમાણિક્યો ભિન્નાશોકવનદ્રુમઃ ॥ ૧૫॥

બલૈકદેશક્ષપણઃ કુમારાક્ષનિષૂદનઃ ।
ઘોષિતસ્વામિવિજયસ્તોરણારોહણોચ્છ્રિયઃ ॥ ૧૬॥

રણરઙ્ગસમુત્સાહો રઘુવંશજયધ્વજઃ ।
ઇન્દ્રજિદ્યુદ્ધનિર્ભીતો બ્રહ્માસ્ત્રપરિવર્તનઃ ॥ ૧૭॥

પ્રભાષિતદશગ્રીવો ભસ્મસાત્કૃતપટ્ટણઃ ।
વાર્ધિનાશાન્તવાલર્ચિઃ કૃતકૃત્યોત્તમોત્તમઃ ॥ ૧૮॥

કલ્લોલાસ્ફાલવેલાન્તપારાવારોપરિપ્લવઃ ।
સ્વર્ગમાકાઙ્ક્ષકીશૌઘદૃક્ચકોરેન્દુમણ્ડલઃ ॥ ૧૯॥ ??
મધુકાનનસર્વસ્વસન્તર્પિતવલીમુખઃ ।
દૃષ્ટા સીતેતિ વચનાત્કોસલેન્દ્રાભિનન્દિતઃ ॥ ૨૦॥

સ્કન્ધસ્થકોદણ્ડધરઃ કલ્પાન્તઘનનિસ્વનઃ ।
સિન્ધુબન્ધનસન્નાહસ્સુવેલારોહસમ્ભ્રમઃ ॥ ૨૧॥

અક્ષાખ્યબલસંરુદ્ધલઙ્કાપ્રાકારભઞ્જનઃ ।
યુધ્યદ્વાનરદૈતેયજયાપજયસાધનઃ ॥ ૨૨॥

રામરાવણશસ્ત્રાસ્ત્રજ્વાલાજાલનિરીક્ષણઃ ।
મુષ્ટિનિર્ભિન્નદૈત્યેન્દ્રો મુહુર્નુતનભશ્ચરઃ ॥ ૨૩॥

જામ્બવન્નુતિસંહૃષ્ટો સમાક્રાન્તનભશ્ચરઃ ।
ગન્ધર્વગર્વવિધ્વંસી વશ્યદ્દિવ્યૌષધીનગઃ ॥ ૨૪॥

સૌમિત્રિમૂર્છાશાન્ત્યર્થે પ્રત્યૂષસ્તુષ્ટવાનરઃ ।
રામાસ્ત્રધ્વંસિતેન્દ્રારિસૈન્યવિન્યસ્તવિક્રમઃ ॥ ૨૫॥

હર્ષવિસ્મિતભૂપુત્રીજયવૃત્તાન્તસૂચકઃ ।
રાઘવીરાઘવારૂઢપુષ્પકારોહકૌતુકઃ ॥ ૨૬॥

પ્રિયવાક્તોષિતગુહો ભરતાનન્દદાયકઃ ।
શ્રીસીતારામપટ્ટાભિષેકસમ્ભારસમ્ભ્રમઃ ॥ ૨૭॥

કાકુત્સ્થદયિતાદત્તમુક્તાહારવિરાજિતઃ ।
રામાયણસુધાસ્વાદરસિકો રામકિઙ્કરઃ ॥ ૨૮॥

અમોઘમન્ત્રયન્ત્રૌઘસ્મૃતિનિર્ધૂતકલ્મષઃ
ભજત્કિમ્પુરુષદ્વીપો ભવિષ્યત્પદ્મસમ્ભવઃ ।
આપદુદ્ધારકઃ શ્રીમાન્ સર્વાભીષ્ટફલપ્રદઃ ॥ ૨૯॥

નામાનીમાનિ યઃ કશ્ચિદનન્યગતિકઃ પઠેત્ ।
મૃત્યોર્મુખે રાજમુખે નિપતન્નાવસીદતિ ॥ ૩૦॥

વિશ્વાકર્ષણવિદ્વેષસ્તમ્ભનોચ્ચાટનાદયઃ ।
સિધ્યન્તિ પઠનાદેવ નાત્ર શઙ્કા કુરુ ક્વચિત્ ॥ ૩૧॥

નામસઙ્ખ્યાપ્યપૂપાનિ યોદત્તે મન્દવાસરે ।
છાયેવ તસ્ય સતતં સહાયો મારુતિર્ભવેત્ ॥ ૩૨॥

॥ ઇતિ શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by Gopal Upadhyay, PSA Easwaran

*shrI HanumadashtottarashatanAma stotram 8*

pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*